# Dharmadevakrita Shri Hari Stuti

# ધર્મદેવકૃતા શ્રીહરિસ્તુતિઃ ૨

## Document Information

Text title : Dharmadevakrita Shri Hari Stuti 2

File name : dharmadevakRRitAshrIharistutiH2.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# ધર્મદેવકૃતા શ્રીહરિસ્તુતિઃ ૨

ધામ્ન્યક્ષરે પરતરે સ્વતનુપ્રકાશે
સિંહાસને વરતરે ચ વિરાજમાનઃ ।
જુષ્ટોઽસિ નાથ નિજમુક્તવરૈઃ સદૈવ
તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૧॥

આત્યન્તિકીં ભુવિ વિધાતુમિહૈવ મુક્તિ
નૈકાત્મનાં પ્રકટિતોઽસ્યધુના કૃપાબ્ધે ।
નાનાવતારનિકરૈકનિદાનમૂર્તે
તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૨॥

યસ્માદ્ ભવન્તિ નિખિલાનિ જગન્તિ ભૂમ્ન-
સ્તિષ્ઠન્તિ ચૈવ પરમાત્મનિ તાનિ યસ્મિન્ ।
લીનીભવન્તિ પ્રલયેઽપિ ચ તાનિ યસ્મિં-
તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૩॥

માયાપરાય વિભવે પરતઃ પરાય
બ્રહ્માક્ષરાદિપતયેઽખિલકારણાય ।
સર્વેશ્વરાય સુખદાય સુમઙ્ગલાય
તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૪॥

હે ભગવાન, ભાયાથી પર, પરથી પએ પર, સર્વમાં વ્યાપ,
ઐશ્વર્યશક્તિસુખવૈભવસૌષ્ઠવાદ્યૈ-
રપ્રાકૃતૈર્ગુણગણૈરભિસેવિતોઽસિ ।
મુક્તીભિશ્ચ નિતરાં પરિસેવનાર્હ-
તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૫॥

ધર્મસ્ય પોષણકૃતેઽપ્યવૃષસ્ય નાશં
કર્તું સ્વકીયમહસા ધૃતમર્ત્યનાટ્યઃ ।
વર્વર્ત્સિ સામ્પ્રતમિહેવ નિદાઘસૂર્ય-

સ્તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૬॥

સ્વીયાશ્રયં કૃતવતાં ભવરોગહર્તા
ત્વં પ્રાણિનાં ચ નિજમૂર્તિસુખપ્રદાતા ।
સ્વામિન્ સદૈવ કરુણૈકમહામ્બુરાશે
તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૭॥

કલ્યાણવર્ત્મ ભવતૈવ યથાગમોક્તં
યાદૃક્ પ્રવર્તિતમિહ ક્વચિદેવ નાન્યૈઃ ।
શુદ્ધસ્વસિદ્ધસદગાધવિબોધવાર્દ્ધે
તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૮॥

દૈત્યા હતા નનુ પુરાવતરૈઃ પ્રભો તે
તેભ્યોઽપિ ભૂરિબલવીર્યયુજઃ સ્મરાદ્યાઃ ।
ધ્વસ્તાસ્ત્વયા સ્વમહસૈવ નિજાશ્રિતાનાં
તુભ્યં નમોઽસ્તુ ભગવન્ પરમેશ્વરાય ॥ ૯॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે પ્રથમપ્રવાહે
એકપઞ્ચાશત્તમે તરઙ્ગે ધર્મદેવકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

---

*Dharmadevakrita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*